# शिक्षाशास्त्रे तन्त्रयुक्तीनाम् उपयोगिता

देवदत्त: सरोदे

सारांश: - शास्त्ररचनायै, शास्त्रावबोधाय च केचनोपाया: शास्त्रेषु प्रयुक्ता: परिगणिताश्च, ते चोपाया: तन्त्रसाधनीभूता: सन्त: तन्त्रकार्याणि साधयन्ति। इमे उपाया: तन्त्रयुक्तिनाम्नाभिधीयन्ते। तन्त्रं नाम शास्त्रम्। युक्तिर्नाम उपाय:, अथवा युक्तिर्नाम युज्यन्ते सङ्कल्प्यन्ते सम्बध्यन्ते परस्परमर्थाः प्राकरणिकेऽभिमतेऽर्थे विरोधव्याघातादिदोषजातमपास्यानयेति युक्तिः[१]। तन्त्रस्य युक्ति: तन्त्रयुक्ति: । शास्त्ररचनाव्याख्याननिमित्तं साधनीभूता: उपाया: तन्त्रयुक्तय:। अत्रासां तन्त्रयुक्तीनां किं प्रयोजनम्? उच्यते- वाक्ययोजनमर्थयोजनं च। शिक्षाशास्त्रं नाम शिक्षणाधिगमशास्त्रम्। छात्रस्य सर्वाङ्गीणविकासाय शिक्षाशास्त्रं मूलाधारत्वेन तिष्ठति। तत्र शिक्षाशास्त्रे अध्यापकस्य अध्यापनकर्मणि, छात्रस्य च पाठावबोधने एता: तन्त्रयुक्तय: नितरामुपकुर्वन्ति।

कूटशब्दा: - तन्त्रयुक्ति:, शिक्षाशास्त्रम्, अधिकरणम्, उद्देश:, योग:, व्याख्यानम्, पूर्वपक्ष:, निर्णय:, ऊह्यम् , उपयोगिता शिक्षणम्, अधिगम:,

ज्ञानं मनुजस्य तृतीयं नेत्रम्[२] इति शास्त्रे उक्तम्। शास्त्रं मनुष्याणां ज्ञानचक्षुः भवति । पुराकालाद् आरभ्य ज्ञानं विज्ञानं च उत्तरवर्तिसन्तत्यै उपदेष्टुं प्रदातुं च शास्त्राणि प्रणिन्युः आचार्याः। सत्यं, ज्ञानं, तत्त्वम् एतेषां सम्यगभिज्ञानाय श्रुत्यादिशास्त्राणि प्रमाणानि उपकारकसाधनानि च सन्ति। प्रमाणभूतं शास्त्रम् अस्मत्प्रामाणिकज्ञानाय जीवातुभूतं वरीवर्त्ति। संस्कृतभाषायाम् अनेकानि शास्त्राणि सन्ति। शास्त्रबोध: सुकरतया भवेद् एतदर्थं कतिपये उपायाः निर्दिष्टा: । शास्त्राणां रचनापद्धति: स्वरूपं च कथं स्यात्? इति मनसि निधाय शास्त्ररचनायै काचित् व्यवस्था, केचन नियमा:, उपाया:, परिकल्पिता आचार्यै:। ते उपायाः तन्त्रयुक्तिनाम्ना अभिधीयन्ते। अत्रासां तन्त्रयुक्तीनां किं प्रयोजनम्? उच्यते- वाक्ययोजनमर्थयोजनं च । शास्त्ररचनायै अपि इमा: तन्त्रयुक्तय: उपयुज्यन्ते। शास्त्रस्य यथायथं स्वरूपं वेत्तुं तन्त्रयुक्तयः महदुपकुर्वन्ति अतःशास्त्रेषु तन्त्रयुक्तय: स्वतन्त्रस्थानम् आवहन्ति ।

शास्त्राणां क्रमबद्धं सुव्यवस्थितं परिपूर्णविषयप्रतिपादनपरं ज्ञानं तन्त्रयुक्तिभि: भवति। शास्त्रावगमाय व्याख्यानाय च एतासां तन्त्रयुक्तीनाम् अनितरसाधारणमहत्त्वं विद्यते। यत: आभि: तन्त्रयुक्तिभि: शास्त्रतत्त्वं प्रकाश्यते, अत: सम्यक् शास्त्रज्ञानाय तन्त्रयुक्तीनाम् अध्ययनम् अपेक्षितम् अस्ति ।

शिक्षायाः प्रमुखोद्देश्यं भवति बालकस्य सर्वाङ्गीणविकासः। शिक्षाशास्त्रं नाम शिक्षणाधिगमशास्त्रम्, सर्वशास्त्रबोधकं शिक्षाशास्त्रम् । शिक्षाशास्त्रस्य घटकेषु यथा शिक्षणविधिषु, शिक्षणसूत्रेषु, शिक्षणोपायेषु शिक्षणाधिगमविषयेषु तन्त्रयुक्तीनां प्रयोगज्ञानं यदि सम्यक् भवति चेत् तत् तन्त्रयुक्तिप्रयोगज्ञानं छात्राणाम् अनुसन्धातृणाम् अध्यापकानां च महते उपकाराय कल्पते । शास्त्रशिक्षणाय, शास्त्राधिगमाय, शास्त्ररचनायै च तन्त्रयुक्तीनाम् उपयोगिता महती विद्यते अतः सम्यक् शास्त्रज्ञानाय शास्त्रशिक्षणकौशलप्राप्तये च तन्त्रयुक्तीनाम् अध्ययनम् अपेक्षितम् अस्ति इति मनसि कृत्वा नानाशास्त्रेषु वर्णितानां परिगणितानां तन्त्रयुक्तीनाम् अनुशीलनं विधाय लक्षणानि परिशील्य शिक्षाशास्त्रस्य नानाविषयेषु तन्त्रयुक्तय: कथम् उपकुर्वन्तीति अस्मिन् लेखे विचार्यते।

तन्त्रयुक्ते: अर्थ:

तन्त्रम् – तन्त्रमिति पदं तनुविस्तारे इत्यस्माद्धातो: औणादिके ष्ट्रन् प्रत्यये कृते सति निष्पद्यते।

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्रयं च कुरुते यस्मात् तन्त्रमित्यभिधीयते।।[३]

युक्ति: - अथ का नु खलु युक्ति:? युक्तिर्नाम "युज्यन्ते सङ्कल्प्यन्ते सम्बध्यन्ते परस्परमर्थाः प्राकरणिके अभिमतेऽर्थे विरोधव्याघातादिदोषजातमपास्यानयेति युक्तिः"। युक्तिर्नाम उपाय:, हेतु:, कारणम्, क्रमबद्धता, रचना, न्यास:, समुचितादय: बहव: अर्था: सन्ति। चरकस्तु युक्तिलक्षणमेवमाह

बुद्धि: पश्यति या भावान् बहून् कारणयोगजान्।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्ग: साध्यते यया॥[४]

यया धर्म: अर्थ: काम: इति त्रिवर्ग: साध्यते अथवा विज्ञातेऽर्थे कारणोपपत्तिदर्शनात् अविज्ञातेऽपि तदवधारणं युक्ति:। ज्ञातार्थे कारणसङ्गतिं वीक्ष्य

अविदितार्थे तत्साधनविनिश्चय: युक्ति: ।

निम्नलिखितश्लोक: तन्त्रयुक्ते: ज्ञानस्य महत्त्वं सूचयति

तद्यथा – "अधीयानोऽपि तन्त्राणि तन्त्रयुक्त्यविचक्षण:।
नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा।।"[५]

शास्त्राण्यधीयान: कश्चन जन: तन्त्रयुक्ती: न जानाति चेत्स तन्त्रार्थं ज्ञातुं न प्रभवति। यथा भाग्यक्षये सति जन: अर्थं प्राप्तुमसमर्थो भवति।

चरकाचार्य: स्वीयं तन्त्रं कथं विशिष्टं दोषरहितं विद्यते तदर्थं हेतुराह तथा च

इदमन्यूनशब्दार्थं तन्त्रं दोषविवर्जितम्।
षट्त्रिंशता विचित्राभिर्भूषितं तन्त्रयुक्तिभि:।।[६]

चरकसंहितायाम् इमा: षट्त्रिंशत् युक्तय: परिगणिता: ।

तत्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च ॥
प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम् ।
उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः ॥
प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः।
पूर्वपक्षविधानानुमतव्याख्यानसंशयाः ॥
अतीतानागतावेक्षास्वसंज्ञोह्यसमुच्चयाः ।
निदर्शनं निर्वचनं संनियोगो विकल्पनम् ॥
प्रत्युत्सारस्तथोद्धारः संभवस्तन्त्रयुक्तयः ।[७]

(१)अधिकरणम् (२)योग: (३)हेत्वर्थ: (४)पदार्थ: (५)प्रदेश: (६)उद्देश: (७)निर्देश: (८)वाक्यशेष: (९)प्रयोजनम् (१०)उपदेश: (११)अपदेश: (१२)अतिदेश: (१३)अर्थापत्ति: (१४)निर्णय: (१५)प्रसङ्ग:(१६)एकान्त: (१७)नैकान्त: (१८)अपवर्ग: (१९)विपर्यय: (२०)पूर्वपक्ष: (२१)विधानम् (२२)अनुमतम् (२३)व्याख्यानम् (२४)संशय: (२५)अतीतावेक्षणम् (२६)अनागतवेक्षणम् (२७)स्वसंज्ञा (२८)ऊह्य: (२९)समुच्चय: (३०)निदर्शनम् (३१)निर्वचनम् (३२)नियोग: (३३)विकल्पनम् (३४)प्रत्युत्सार: (३५)उद्धार: (३६)सम्भव: ।

शिक्षाशास्त्रस्य नानाघटकेषु तन्त्रयुक्तीनाम् उपयोगिता

i. अधिकरणम् - Topic of Discussion

   i. लक्षणम् - 'अधिकरणं नाम यमर्थमधिकृत्य प्रवर्तते कर्त्ता' । विघ्नभूता यदा रोगा इत्यादि[८] ।

   ii. विवरणम् – यदा ऋषीणां तपश्चरणे रोगा: बाधका : सञ्जाता:, तदा ऋषय: तान् रोगान् निवारयितुं तद्अधिकृत्य आयुर्वेदशास्त्रं प्रणिन्यु: । इह खलु आयुर्वेदशास्त्रे ऋषय: रोगान् अधिकृत्य प्रावर्तन्त शास्त्रञ्च रचयामासु:, अत: अत्र रोगा: अधिकरणम्। अथवा शास्त्रस्य प्रमुखविषय:, प्रतिपाद्यविषयो वा अधिकरणम् ।

   iii. विनियोग: - पाठ्यपुस्तकरचनायाम् इदमधिकरणम् उपकर्तुं प्रभवति। यथा – पतञ्जलिना प्रणीतं योगशास्त्रं योगमधिकृत्य प्रवर्तते तथा च अथ योगानुशासनम्[९] इति प्रथमसूत्रे शास्त्रं किमधिकृत्य प्रवृत्तम् इति निर्दिष्टम् अत: इह योग: अधिकरणम् । एवमेव अथ शब्दानुशासनम्[१०] इत्यत्रापि व्याकरणशास्त्रम् अधिकरणम् अस्ति। एवमन्यात्रापि बोद्धव्यम् । पाठ्यपुस्तकरचनाप्रसङ्गे, शास्त्ररचनाकाले एतदवधेयं यत् पाठ्यपुस्तकस्य शास्त्रस्य वा प्रधानविषय: सदा केन्द्रीभूत: स्यात् । अधिकरणं नाम यदधिकृत्य प्रवर्त्तते शास्त्रं स्थानम् अध्याय: प्रकरणं वाक्यं ( सूत्रम्) वा । आयुर्वेदशास्त्रे अधिकरणमेवं प्रयुक्तम् - चरकसंहिता शास्त्रमिति शास्त्राधिकरणं तस्मिन् शास्त्रे स्थानानि सन्ति तत्स्थानाधिकरणम्, तेषु स्थानेषु अध्याया: सन्ति तत् अध्यायाधिकरणम्, अध्यायेषु प्रकरणानि सन्ति तत् प्रकरणाधिकरणम्, प्रकरणेषु सूत्राणि (वाक्यानि वा) सन्ति तत् सूत्राधिकरणम् एवं रीत्या शास्त्ररचना व्यवस्थितक्रमेण भवति। एतेन एकस्य शास्त्रस्य सकलं ज्ञानं व्यवस्थितरीत्या क्रमेण एकत्र निहितं भवति, एतस्य अध्ययनेन तत्रत्यकृत्स्नविषयान् विज्ञाय अध्येता तच्छास्त्रकोविदो भवितुमर्हति।



अधिकरणस्य अपरमपि लक्षणं विद्यते ।

i. लक्षणम् - विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः ॥[११]




ii. विवरणम् - विषयः, विशयः, पूर्वपक्षः, उत्तरपक्षः, सङ्गतिः इति एभिः पञ्चभिः सोपानैः विषयनिरूपणं क्रियते। शास्त्रे विषयोपस्थापनं व्यवस्थितक्रमेण क्रियते, तदर्थमाश्रितः क्रमः एव अधिकरणनाम्ना प्रोच्यते। आदौ विषयः कश्चन प्रस्तोतव्यः। अधिकरणस्य प्रथमः अवयवः भवति विषयः । विषयो विचारार्हं वाक्यम्। अथवा शास्त्रस्य प्रतिपाद्यं मुख्यं तत्त्वम् । कस्मिंश्चित् विषये निर्णयात् प्राक् प्रथमतः विषयस्य उपस्थापनं क्रियते । तस्य विषयस्य प्रस्तावे का पूर्वसङ्गतिः इति प्रतिपादयेत् । विशयः नाम संशयः । विशयो नामाऽस्यायमर्थो न वा। अयम् अधिकरणस्य द्वितीयः अवयवः भवति । एकस्मिन् एव विषये द्वैपाक्षिकविचारः भवति इदं वा तद्वा । अथवा उभयकोटिस्पृग्ज्ञानं संशयः । पाठनप्रसङ्गे विषयोपस्थानात् परं तस्मिन् विषये विद्यमानः संशयः कः इति संदेहः उद्भावनीयः। समुत्पन्ने सन्देहे पूर्वपक्षः कश्चन प्रतिपाद्येत सिद्धान्तभिन्नं वादिभिन्नम् अपरस्य मतसमर्थनम् एव पूर्वपक्षः । प्रकृतविषयस्य यावन्तः सम्भाविताः पूर्वपक्षाः भवन्ति तावन्तः छात्रमुखेन उद्भावनीयाः ततः परं समेषां पूर्वपक्षाणां निरासपूर्वकं समाधानरूपं सिद्धान्तम् उपस्थापयेत्। एतेन सिद्धान्तः दृढप्रतिष्ठः भवति। पूर्वपक्षस्य युक्तेः वर्जनम् कृत्वा स्वस्य पक्षस्य युक्तेः सिद्धिः एव उत्तरपक्षस्य सिद्धान्तः । सिद्धान्तपक्षः एव उत्तरपक्ष इति कथ्यते। ततः परं शास्त्रवचनस्य सङ्गतिः निर्दुष्टैकवाक्यता सम्पादनीया । एवं शास्त्रस्य प्रतिपाद्यविषयस्य सर्वाणि अङ्गानि, सर्वपक्षान् विमृश्य क्रमिकतया अशेषपूर्वपक्षान् उद्भाव्य सयुक्तिकं सोदाहरणं पूर्वपक्षान् निरास्य उत्तरपक्षं सिद्धान्तपक्षं समाधानपुरस्सरं शास्त्रसङ्गतिञ्च सम्पाद्य विषयनिरूपणं कुर्यात्

ii. विनियोग: - अध्यापक: छात्राणां पुरत: विषयं प्रस्तौति। छात्रा: विषयं श्रुत्वा प्रस्तुतविषये विविधान संदेहान् प्रकटीकुर्वन्ति। संदेहान् अवलम्ब्य छात्रा: पूर्वपक्षान् उपस्थापयन्ति। तदा अध्यापक: प्रीत्या सप्रमाणं सर्वपूर्वपक्षान् खण्डयित्वा स्वपक्षमण्डनं करोति स्वसिद्धान्तं च स्थापयति। पाठ्यविषयवचनस्य सङ्गतिं सम्पादयति। एवंरीत्या अध्यापनेन छात्राणां विषयबोध: सुष्ठु सम्पद्यते।

शिक्षाशास्त्रदृशा अधिकरणस्य द्वौ पक्षौ भवत:, यथा- १. रचनापक्ष:, २. व्याख्यानपक्ष: च।

१.रचनापक्षः – शैक्षिकव्यवस्थायां कस्यापि शास्त्रस्य विषयस्य वा क्रमिकं व्यवस्थितं ज्ञानम् अपेक्षितम् इति हेतो: पाठयक्रमः अनिवार्यः भाग: भवति । पाठयक्रमे शिक्षणस्य ज्ञानात्मकः, भावात्मकः अपि च मनोगत्यात्मकः इति त्रयः पक्षा: सम्मिलिता: भवन्ति । विद्वद्भि:अध्यापकै: निश्चितः तर्कपूर्ण: पाठयक्रमः निर्मितः भवति । एष: पाठयक्रमः पाठ्यक्रमरचनासिद्धान्तान् आधारीकृत्य भवति। बालानां सुखबोधाय पाठयक्रमे क्रमबद्धं विषयवस्तु पाठरचना च भवेत् तदर्थम् अत्र अधिकरणतन्त्रयुक्ति: महदुपकरोति।

कक्षायां छात्रान् पाठयितुम् अध्यापक: कमपि विषयमवलम्ब्य पाठनस्य पूर्वसन्नाहं करोति प्रभाविशिक्षणाय पाठयोजनां निर्माति। अत्र मुख्यत्वेन अनेन अध्यापनेन कानि उद्देश्यानि साधनीयानि इति मनसि कृत्य उद्देश्यलेखनं करोति। कथञ्च सम्पादनीयानि इति विनिश्चित्य शिक्षणव्यूहं रचयति सर्वमेतत् विस्तरेण पाठयोजनायां लिखति, अत्र बहूनि सोपानानि भवन्ति। भिन्नभिन्नसोपानेषु भिन्नभिन्नतन्त्रयुक्तिं प्रयुङ्क्ते। एवं रचनापक्षे तन्त्रयुक्तीनां प्रयोग: उपयोगिता च भवति।

२. व्याख्यानपक्ष: - अध्यापनवेलायां पाठयोजनां समाश्रित्य अधिकरणस्य उपयोगः भवति । अधिकरणस्य पञ्चसोपानै: छात्रा: बोधनीया: । अधिकरणस्य पञ्चयुक्तिवाक्यानि कठिनविषयं सरलीकर्तुं स्पष्टीकर्तुं च प्रभवन्ति । एषु पञ्चसोपानेषु व्याख्याया: मूलभावानानां विचाराणां च समुचितं सन्तुलितं च सारतत्त्वं भवेत् । अध्यापकः विभिन्नोपायै: छात्राणाम् अवधानमाकृष्य व्याख्यानं विदध्यात् ।

अध्यापकः पाठनसमये विषयः, संशयः, पूर्वपक्षः, उत्तरपक्षः, निर्णयः एभि: पञ्चभि: सोपानै: अधिकरणस्य विषयस्य स्पष्टीकरणं कुर्यात् । व्याख्यानं सोद्देश्यं, सरलं, शुद्धं, स्पष्टं बोध्यगम्यञ्च भवेत् ।

2) योग: - Correlation, Joining, Connecting, Concomitance

i. लक्षणम् - योगो नाम अन्वयः । योगो नाम योजना व्यस्तानां पदानामेकीकरणम्[१२]।

ii. विवरणम् - योगो नाम अन्वय:। भावावगाहनाय कर्तृकर्मक्रियादीनां कश्चन क्रमः आवश्यकः, ईदृशक्रमज्ञानाय अन्वयः आवश्यकः। अर्थानुसारिपदनिधानं नाम अन्वय: । अन्वयमाध्यमेन शास्त्रस्य, पद्यस्य अर्थबोधः शीघ्रं भवति । अन्वयस्य उपयोगस्तु पद्यपाठने भवति । गद्यम् अन्वयं विना पाठयितुं शक्यते पद्यन्तु न तथा । गद्ये कर्त्ता, कर्म, क्रिया च क्रमशः भवन्ति, पद्ये न तथा। अन्वयसम्पादनाय अयं क्रम: समाश्रयणीय:।

कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततःपरम् ।
किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत् ।।
ल्यबन्तञ्च तुमन्तञ्च त्त्वान्तं कर्मविभूषितम् ।
खण्डान्वये पुनः प्रश्नपूर्वमन्ते प्रयोजयेत् ।।[१३]

अन्वयसम्पादनाय श्लोके विद्यमानं प्रधानं वाक्यमन्वेषणीयम् । प्रधानवाक्यस्यान्वेषणानन्तरं क्रियापदं मृग्यम्। तत्क्रियापदम् आदाय अन्यानि पदानि सार्थकक्रमे योजयितुं शक्नुमः । अत: पद्ये अन्वयं कर्तुम् आदौ केन्द्रीभूतं क्रियापदं द्रष्टव्यं ततः आकाङ्क्षया कर्तृकर्मकरणादिकारकाणि तद्विशेषणानि अन्यानि पदानि क्रियया सह योजनीयानि। कर्तृकर्मकरणादिपदानां ज्ञानाय कः किम्, केन, कस्मै, कस्मात्, कस्य इति सर्वनामशब्दानां रूपाणि पुरस्कृत्य प्रश्नाः पृष्टव्या: । विशेषणानां ज्ञानाय कीदृशम्, किं भूतम् , कथं भूतम्, इत्यादयः प्रश्नाः प्रष्टव्याः । क्रियाणां ज्ञानाय किं करोति, किं कृत्वा इत्यादयः प्रश्नाः प्रष्टव्याः । क्रिया विशेषणानां ज्ञानाय कुतः, कुत्र, कदा, कथं, किमर्थम् इति पदान्यादाय प्रश्नाः प्रष्टव्याः । एवं किमो रूपाणि समाश्रित्य आकाङ्क्षामुखेन प्रश्नान् पृष्ट्वा अन्वयं सम्पादयेत् ।

अत्र प्रश्नानां कश्चन क्रमो भवति तेन विषयबोध: अन्वयसम्पादनञ्च लीलया भवति।

iii. विनियोग: - पद्यशिक्षणे अस्या: योगतन्त्रयुक्ते: विनियोग: भवति ।
पद्यस्य व्याख्यानं निम्नाङ्कितलक्षणेन क्रियते ।

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम् ।। [१४]

अत्र वाक्ययोजना नाम अन्वय:। पद्ये छन्दोऽनुरोधेन व्यस्तानां पदानाम् अर्थानुसारम् एकार्थतायै एकवाक्यतासम्पादनम् अपेक्षितम्। अन्वयेन एकार्थता सम्पाद्यते । दण्डान्वयेन खण्डान्वयेन वा पद्यस्य अर्थावगाहने सौकर्यं भवति । विषय: सम्पूर्णरूपेण ज्ञातुं शक्यते । श्लोकस्य भावावगहनं सरलतया भवति । छात्राणां कृते मनोरंजकतया प्रभावोत्पादकतया च पद्यं शिक्षयितुं शक्यते ।

i. लक्षणम्- योगः नाम योजना ।
ii. विवरणम् - योगो नाम योजनम्, सम्बन्धकल्पनम् यथा - उद्देशनिर्देशयोः योजनम् ।
iii. विनियोग: - पाठयोजनासु उद्देशनिर्देशयोः योजनं भवति । पाठयोजनासु शीर्षकव्याख्यानयो: योगः भवति । पाठ्यविषयस्य शीर्षकम् उद्देश:, शीर्षकस्य व्याख्यानम् निर्देशः भवति । उदाहरणं यथा - कक्षायाम् अध्यापकः पर्यावरणप्रदूषणम् इति शीर्षकम् अधिकृत्य पाठयति तर्हि पर्यावरणप्रदूषणम् इति उद्देश: भवति । पर्यावरणप्रदूषणस्य व्याख्यानं निर्देश: भवति। यदि अध्यापक: शीर्षकमतिरिच्य अन्यस्य व्याख्यानं करोति तर्हि उद्देशनिर्देशयोः सम्बन्ध: भवितुं नार्हति । अध्यापने अध्यापक: विषयं केन्द्रीकृत्य प्रवर्तेत। प्रधानविषयं लक्ष्यीकृत्य तस्य सर्वविधव्यूहरचना तदनु क्रमिकं शिक्षणं भवेत् तदानीं तस्य शिक्षणं सफलं भवति।

i. लक्षणम् - योगो नाम योजनम्, सम्बन्धकल्पनम् । सूत्रभाष्ययोः योजनम् योगः
ii. विवरणम् - सूत्रभाष्ययोः योजनम् योगः। सूत्रभाष्ययोः सन्धानं स्यात्।

सूत्रानुसारं भाष्यं भवति तर्हि तन्नाम योगः। यथा – व्यासभाष्यं, शाङ्करभाष्यम्। महाकाव्यस्य (तत्पद्यानां) व्याख्या, टीका वा
यथा- कालिदासस्य काव्यानां व्याख्यानं मल्लिनाथ: पद्यस्य अन्वयमुखेन करोति तथा च मल्लिनाथेन एवं प्रतिज्ञायते

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते[१५]।।

मल्लिनाथ: स्वीयटीकासु यथा तेन प्रतिज्ञातं तदनुसारं पद्यस्य व्याख्यानं करोति । मनागपि पद्यस्य मूलतत्त्वं विहाय अन्यथा व्याख्यानं न करोति परमन्वयमुखेनैव व्याख्यानं करोति। व्याकरणे वृद्धिरादैच् इति सूत्रम्, अस्य वृत्ति: भाष्यमपि सूत्रानुरूपमेव विद्यते। अत: अत्र सूत्रभाष्ययो: योगो विद्यते।

iii. विनियोग: - छात्राध्यापक: कक्षायां कञ्चन विषयं तस्य शीर्षकम् अवलम्ब्य पाठयति व्याख्यानं वा करोति न तु अन्यत् शीर्षकम् आधृतं व्याख्याति तर्हि अत्र योगतन्त्रयुक्ते: प्रयोगकारणात् तस्य व्याख्यानं प्रभावि भवति शिक्षणं सफलं भवति । यदि अध्यापक: व्याकरणे गुणसन्धि: इति पाठस्य शीर्षकम् अनुसृत्यैव व्याख्यानं करोति चेत् स अध्यापक: 'योग' इति तन्त्रयुक्तिं प्रयुङ्क्ते इति मन्यामहे ।

i. लक्षणम्- योगः नाम योजना ।
ii. विवरणम् -प्रतिज्ञा, हेतु:, उदाहरणम्, उपनय:, निगमनम्। योगः इति उच्यमाने पञ्चयुक्तिवाक्यानां सन्धानम् । कस्यचित् विषयस्य प्रतिपादनार्थं पञ्चयुक्तिवाक्यानामावश्यकता वर्त्तते। पञ्चयुक्तिवाक्ययोजनम् योगःइति उच्यते ।




iii. विनियोग: - तार्किकरीत्या विषयनिरूपणं एभि: पञ्चयुक्तिवाक्यै: सम्भवति । यथा अत्र पर्वत: वह्निमान् अस्ति इति परार्थानुमानेन एभि: पञ्चयुक्तिवाक्यै:

निरूप्यते ।

- प्रतिज्ञावाक्यम्- पर्वतो वह्निमान् ।
- हेतुवाक्यम् - धूमवत्त्वात् ।
- दृष्टान्तवाक्यम् - यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसे।
- उपनयवाक्यम् - पर्वतोऽपि धूमसत्त्वाद् वह्निरेव ।
- निगमनवाक्यम् - धूमसत्वाद् वह्निसत्वे पर्वतो वह्निमान् इति सुनिश्चितं भवति ।

एवमन्यत्रापि अध्यापक: अध्यापनावसरे अनया तन्त्रयुक्त्या प्रभाविरीत्या विषयनिरूपणं कर्तुमर्हति ।

3) उद्देश: - Mention in brief

i. लक्षणम् - समासवाक्यम् उद्देशः[१६] । नाममात्रेण वस्तुसंकीर्तनम् उद्देश:

ii. विवरणम् - नाममात्र कथनम् उद्देश: इति कथ्यते।

iii. विनियोग: - पाठ्यविषयस्य शीर्षकम् उद्देश: भवति । अध्यापनवेलायाम् अध्यापकः प्रधानविषयस्य कृत्स्नश: अवबोधाय प्रधानशीर्षकस्य खण्डश: उपशीर्षकाणि आदाय व्याख्यानं कुर्यात्। उपशीर्षकाणि तत्र उद्देशः भवति।

4) निर्देश: - Mention in detail, Amplification

i. लक्षणम् - निर्देशो नाम संक्षेपेणोक्तस्य विस्तरेण विवरणं यथा हेतुलिंगौषधस्य पुनः प्रपञ्चनम्[१७]।

ii. विवरणम् - विस्तरविवरणम् निर्देशः। सुव्यवस्थिततार्किकविवरणं निर्देशः इति उच्यते। वस्तुत: उद्देशनिर्देशौ परस्परं पूरकौ स्त:। उद्देशस्य विस्तरविवरणं निर्देशो भवति।

iii. विनियोग: - कक्षाध्यापने व्याख्यानवेलायां निर्देशस्य उपयोगः भवति । विस्तरेण स्पष्टविवरणं इति निर्देशः। विवरणात्मके व्याख्याने कस्यचित् विषयस्य, विचारस्य, सिद्धान्तवाक्यस्य वा मुख्यार्थः स्पष्टीक्रियते । छात्राणां

सम्मुखे उत्तमव्याख्याने श्रोतॄणां मानसपटले विषयस्य स्पष्टचित्रोपस्थापनं भवति। अतः स्पष्टं रचितं रोचकञ्च विस्तरविवरणं निर्देशः इति कथ्यते।

5) प्रयोजनम् - Purpose, Aim

i. लक्षणम् - प्रयोजन नाम यदर्थं शास्त्रादि प्रवर्तते [१८]।

ii. विवरणम् - प्रयोजनमाध्यमेन कार्यस्य दिशा निर्दिष्टा भवति। किम् करणीयम्? कथं करणीयम्? इति। पाठयोजनालेखने उद्देश्यानि लेख्यानि भवन्ति। इमानि उद्देश्यान्येव प्रयोजनं सूचयन्ति। शास्त्रेष्वपि अनुबन्धचतुष्टयम्भवति तत्र प्रयोजनम् अन्यतमं विद्यते। शास्त्रमिदं किम् उद्दिश्य प्रवृत्तम् इति।

iii. विनियोग: - अध्यापकः पाठयोजनायां बहूनि सोपानानि रचयति। तत्र तत्र सोपाने तत् तत् उद्देश्यम् अनुसृत्य पाठयति। प्रयोजनं विना अध्यापनं भवति तर्हि निष्फलं भवति। अध्यापकस्य प्रयोजनं भवति छात्राणाम् अधिगम:। स च अधिगम: उद्देश्यमिशेन अध्यापक: लिखति। उद्देश्यानि तत्र स्पष्टानि स्युः अत: १.सञ्ज्ञात्मकानि उद्देश्यानि, २. मनोगत्यात्मकानि उद्देश्यानि, ३. भावात्मकानि उद्देश्यानि चेति त्रिधा विभज्य अध्यापक: लिखति। अध्यापनेन तानि प्राप्तुं यतते। सोपानमाध्यमेन पाठनं तत: तदुद्देश्यप्राप्ति: तस्य पाठस्य प्रयोजनं भवति। पाठयोजनायां शिक्षकः विभिन्नसोपानेषु उद्देश्यानि लक्ष्यीकृत्य छात्राणां कौशलानां विकासं सम्पादयति यथा -

- अध्यापकस्य आदर्शवाचनेन छात्राणां श्रवणकौशलस्य विकास: भवति।
- अनुवाचनद्वारा छात्राणां पठनकौशलस्य विकासः भवति।
- अशुद्धिसंशोधनम् इति पाठयोजनासोपानेन अध्यापक: छात्राणां शुद्धोच्चारणलेखनकौशलयोः विकासं सम्पादयति।

6) उपदेश: - Instruction

i. लक्षणम् - एवं वर्तितव्यम् इति उपदेश: [१९]। आप्तानुशासनं वा उपदेश:।

ii. विवरणम् - आचार्यस्य शास्त्रम्, शिक्षणम्, प्रबोधनम् उपदेशो भवति। आप्तानामनुशासनम् उपदेशः इति। यद् यत् करणीयं, सेवनीयं, वेदनीयं तत् तत् सर्वम् आचार्य: उपदिशति। यथा – सत्य वद, धर्मं चर, स्वाध्यायान्मा

प्रमदः इति। एष उपदेशः प्राचीनकाले मौखिकरूपेण प्रवर्तते स्म ततः परं लिखितरूपेण प्रवृत्तः। प्राचीनकाले आप्तानां सर्वं शिक्षणं मौखिकमासीत्। कण्ठस्थीकरणस्य, स्मरणस्य च महत्त्वमधिकं भवति स्म। आचारः, शिष्टता, सभ्यता, संस्कृतिः, देशभक्तिः इत्यादीन् आप्तजनाः छात्रेभ्यः उपदिशन्ति । वेदाः, उपनिषदः, पुराणानि, इतिहासः इत्यादीनां ज्ञानं सम्पाद्य धार्मिकभावनायाश्च संवर्धनाय सच्चारित्र्यसम्पादनाय उपदेशः उपकरोति।

iii. विनियोगः - भावात्मकोद्देश्यानां सम्पादनाय उपदेशः उपकरोति। पाठपाठनात् परम् अनेन पाठेन का शिक्षा प्राप्यते? अस्मासु के गुणाः आयान्ति ? इति अध्यापकः छात्रान् पृच्छति। छात्राणां नैतिकमूल्यानां संवर्धनाय शिक्षणं सम्यक् कर्त्तुं अभिप्रेरणनिमित्तम् आचार्यः उपदिशति अथवा आचार्यस्य उपदेशः अपेक्ष्यते । उपदेशप्रभावेण छात्राः सदाचारगुणान् धारयन्ति । सहिष्णुता, परोपकारः, सत्यवाक्, क्षमाचरणं, दयादाक्षिण्यादयः नैतिकमूल्यानामाधाराः सन्ति। एतेषां नैतिकमूल्यानामाचरणेन छात्राः प्रशंसाभाजः भवन्ति । उपदेशस्य अन्यः एक अर्थः भवति अनुशासनम् । अनुशासनमाभूषणं जीवनम् अलङ्करोति। अनुशासनं हि जीवनस्य सर्वान् कार्यकलापान् प्रभावयति जीवनम् उन्नतं करोति ।

7) नियोगः - Command

i. लक्षणम् - इदमेव कर्त्तव्यमिति नियोगः[२०]।

ii. विवरणम् - नियोगः इत्यस्य तात्पर्यं भवति अनिवार्यतया करणीयम् अत्र कामाचारः नास्ति । यत् किञ्चित् शास्त्रमुखेन तत्र निर्देशः दीयते एतत् कर्त्तव्यम् एतत् न कर्त्तव्यम् इति सा नियोगयुक्तिः उच्यते । नियोगः इति उच्यमाने तत्र अनिवार्यतया पालनं कर्त्तव्यम् ।

iii. विनियोगः - छात्राणां भाषासंवर्द्धननिमित्तं अनिवार्यतया कर्त्तव्यमिति मौखिककार्यम्, अभ्यासः अथवा लिखिताभ्यासः नियोगपुरस्सरं दीयते तर्हि अवश्यम् तत् कर्त्तुम् अर्हन्ति छात्राः। एतेन छात्रेषु कौशलानां विकासः जायते, परिश्रमस्य गुणः विकसति, कालक्रमेण स्वभावत्वेन परिणमते। यद्

यत् कर्त्तव्यम् अपेक्षितम् अस्ति इति तत् तत् नियोगपक्षेण छात्रैः कारणीयम् । छात्राः तत् कार्यं सम्पाद्य प्रयच्छन्ति । मौखिककार्यं वा भवतु लिखितकार्यं वा भवतु अथवा अन्यत् सामाजिककार्यं वा भवतु यदि नियोगेन कार्यते चेत् व्यवस्था भवति । नियोगेन कार्यते चेत् छात्राः अनुशासने भवन्ति ।

8) विधानम् – Arrangement

i. लक्षणम् - प्रकरणानुपूर्व्यभिहितं विधानम्[२१] । क्रमपूर्वकं उपस्थापनम् विधानम् ।

ii. विवरणम् - प्रकरणानुपूर्व्यभिहितम् विधानम् । यथा - न्यायदर्शने षोडशपदार्थानां क्रमः वर्णितः । षोडशपदार्थज्ञानात्पूर्वं षोडशपदार्थानां क्रमः वेदितव्यः। षोडशपदार्थानां क्रमः भवति – प्रमाणम्, प्रमेयम्, संशयः, प्रयोजनम्, दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः, वादः, जल्पः, वितण्डा, हेत्वाभासः, च्छलः, जातिः, निग्रहस्थानम् इति ।

iii. विनियोगः - अध्यापकः कक्षायाम् अध्यापनप्रसङ्गे क्रमिकतया विषयोपस्थापनं कुर्यात् । शिक्षाशास्त्रे क्रमोपस्थापनम् अत्यन्तं महत्वपूर्णं भवति । यथा पाठयोजनायां कश्चन क्रमः भवति तम् क्रमम् अध्यापकः अनुसरति । यदि अध्यापकः पाठ्यसामग्र्यः क्रमबद्धरीत्या प्रस्तौति तर्हि छात्राः द्रुतं न्यूनातिन्यूनदोषान् कृत्वा वाञ्छितोद्देश्यानि प्राप्नुवन्ति । आधुनिककालेऽस्मिन् क्रमबद्धस्य अधिगमस्य उपयोगेन विभिन्नशिक्षासंस्थासु पाठ्यक्रमं निर्माय छात्राणां मानसिकतायाः अनुगुणं शिक्षणं दीयमानं वर्तते । छात्राणां क्रमिकविकासः अनेन अभिक्रमेण सञ्जायते । एकैकं सोपानम् आरुह्य विद्यार्थी उत्तरोत्तरज्ञानं प्राप्तुमर्हति । अध्यापकः यदि पाठयोजनामनुसृत्य पाठयति तदानीं तस्य पाठने कश्चन क्रमः भवेत्, आदौ प्रस्तावना ततः परं विषयस्य उद्देश्यं, व्याख्यानम्, पूर्वपक्षः ततः परं समाधानम्, उपसंहारः अथवा सारकथनम् एवं तत्र प्रत्येकं विषयः क्रमे भवति ।

9) व्याख्यानम् - Explanation

i. लक्षणम् - व्याख्यानं नाम संक्षेपेणोक्तस्यार्थस्य विस्तरेण वर्णनं

व्याख्यानम्[२२]।

ii. विवरणम् - व्याख्यानस्य तात्पर्यम् भवति स्पष्टीकरणं, विवरणम् । शास्त्राणां सम्यग् अर्थप्रतिपत्तये वृत्तिर्व्याख्यानमनिवार्यम् । भाष्यकारः महाभाष्ये प्राह व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् [२३] इति । तथा च व्याख्यानस्य लक्षणम् -

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम् [२४]।।

सूत्राणां पदच्छेदं विधाय पदार्थं संबोध्य समासविग्रहं विधाय अर्थप्रतिपत्तिं कृत्वा, पदानि यथाक्रमं सार्थकं संयोज्य, तद् गतार्थं प्रतिपाद्य, तदुपरि पूर्वपक्षरूपेणाक्षेपं विधाय, तस्य समाधानं कृत्वा निश्चितसिद्धान्तस्थापनम् अर्थनिष्पतिः व्याख्यानं भवति । एवं षड्भिरुपायैः साधनैः सूत्रार्थः सूत्रव्याख्यानं वा कार्यम्। अपरे केचन व्याख्यानस्य लक्षणमेवमाहुः

सूत्रार्थश्च पदार्थश्च हेतुश्च क्रमशस्तथा ।
निरुक्तम् अथ विन्यासो व्याख्या योगस्य षड्विधा [२५]।।

iii. विनियोग: - पाठयोजनायां कठिनविषयाणाम् अत्यन्तसरलतया बोधगम्यरीत्या स्पष्टीकरणं व्याख्यानम् भवति। अध्यापनकाले व्याख्यानं पाठस्य हृदयभाग: भवति । सर्वे जटिला: दुरुहा: विषया: व्याख्यानेनैव स्पष्टा भवन्ति। भाष्यकार: एवं वर्णयति यत्र यत्र विषयेषु सन्देहे जाते सति सन्देहानाम् अपाकारणं, संशयानाम् दूरीकरणं आक्षेपाणां समाधानम् व्याख्यानेन भवति। अध्यापनकर्मणि अध्यापकस्य सर्वाधिकं महत्त्वपूर्णं कार्यं व्याख्यानं भवति।

10) पदार्थ: Word meaning

i. लक्षणम् - पदार्थो नाम पदेनार्थो गम्यते[२६]।

ii. विवरणम् - पदस्य पदयो: पदानां वाऽर्थ: पदार्थ: अपरिमिताश्च पदार्था:। पदार्थ इत्यस्य तात्पर्यम् अस्ति पदस्य अर्थ:। पदार्थ: इत्यस्य तात्पर्यं भवति पदस्य, पदयो:, पदानाम् अर्थप्रकटीकरणम् । शब्दात् जायमान यः बोधः अस्ति स एव बोधः शब्दार्थ: पदार्थ: वा भवति । ततः परं पदार्थानाम्

समुच्चयेन वाक्यार्थबोधः भवति ।

iii. विनियोग: - अध्यापकः पद्यशिक्षणे एकैकस्य पदस्य पदार्थं बोधयेत्, गद्यशिक्षणे कठिनशब्दानाम् पदार्थान् ब्रूयात् । पदार्थान् स्पष्टीकृत्य एव विषयस्य अवबोधः भवितुम् अर्हति । पदानाम् अर्थस्पष्टीकरणाय नैकप्रविधय: सन्ति । यथा- निर्वचनेन, कोशेन, ऐतिह्यप्रसङ्गेन, व्युत्पत्या, विलोमपदेन, समानार्थकपदेन च ।

11) संशय: - Doubt

i. लक्षणम् - संशयो नाम साकांक्षत्वमनिश्चितमस्तु विज्ञानम्[२७]। उभयतो हेतुमान् अर्थ: संशय: ।

ii. विवरणम् – एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः । उभयसाधारणो यो धर्म्मस्तज्ज्ञानं संशयसाधनम् । यथा - उच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति। एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्श:।

उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति[२८]।

iii. विनियोग: - साम्प्रतिकी छात्रकेन्द्रिता शिक्षा भवति। छात्रास्तु जिज्ञासवो भवन्ति । अध्यापकः नूतनविषयं यदा प्रस्तौति तदा तद्विषयकशंका जायते स्वभाविकम् एतत् , तदानीम् अध्यापकः तां शंकां सम्यक् विचार्य यथोचितरीत्या शंकायाः समाधानं कुर्यात् । छात्राणां कृते संशयनिमित्तम् अवसरः देय: । यदि छात्राः सन्देहं कुर्वन्ति ततः परमेव विषयस्य सम्यक् स्पष्टीकरणं भवति अर्थात् सन्देह: अपरदृष्ट्या पूर्वपक्षः भवति । पूर्वपक्षस्य निराकरणेन सिद्धान्तपक्षः दृढ: भवति । विषयस्य अवगमनं सम्यग् जायते । यदि अध्यापकः कमपि विषयं पाठयति तर्हि आदौ तत् छात्राणां कृते नूतनं भवति तत्र संन्देह: जायते अत एव ते छात्रा: संन्देहान् प्रकटीकुर्वन्ति तदानीम् अध्यापकः तान् प्रेरयति, संदेहानां समाधानं करोति तदा च्छात्रा: उत्साहेन पठन्ति । यदि छात्रान् निराकरोति, तर्जयति, तर्हि छात्राः उत्साहिनः न भवन्ति, पठने विमुखाः भवन्ति, अतः यद्यपि छात्रेषु संन्देहा: जायन्ते चेत् मनोवैज्ञानिकदृष्ट्या सन्देहानां समाधानं अध्यापकेन विधातव्यम् ।

12) निर्वचनम् – Etymological Definition

i. लक्षणम् -निर्वचनं नाम निर्णयार्थवचनं निरुक्तैः[२९]। निर्वचनम् नाम निरुक्तम् ।

ii. विवरणम् - शास्त्राध्यापनवेलायां तत्र बहूनि पदानि आयान्ति तेषां पदार्थविषये संशयः भवति, अतः तेषां पदानां यदि शास्त्रीयनिर्वचनं वयं कुर्मः तर्हि यथार्थबोधो भवति ।

iii. विनियोगः - अध्यापकः पाठनप्रसङ्गे आचार्यः इति पदस्य कः अर्थः भवति? इति पृच्छति तदा तस्य पदस्य अर्थः अध्यापकः शिक्षकः इति कथने समीचीनं न प्रतिभाति। यदि आचारं ग्राहयति आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा[३०] निर्वचनपुरस्सरं बोधयति तर्हि तेन आचार्यपदं स्पष्टं भवति । एवंरीत्या संस्कृतपदानां, शास्त्रीयपदानां प्रसंगे निर्वचनम् विधातव्यम्। तेन तस्य शास्त्रीयवचनं प्रसङ्गश्च स्पष्टं भवति।

13) पूर्वपक्षः - The prima facie Argument

i. लक्षणम् - आक्षेपपूर्वकः प्रश्नः पूर्वपक्षः [३१]।
पूर्वपक्षो नाम आक्षेपयुक्तैः वचनैः उक्तविषये आपत्तिप्रस्तावः विप्रतिपत्तिर्वा ।

ii. विवरणम् - आक्षेपपक्षः नाम सिद्धान्तभिन्नपक्षः ।

iii. विनियोगः - अध्यापकः यदा साहित्यं, व्याकरणम् अथवा आधुनिकज्ञानविषयकं पाठं पाठयति, तदानीं स्वभाविकतया तत्र छात्राणां मनसि संशयः जायत। यत्र यत्र अवबोधः सम्यक् न भवति तत्र तत्र संशयः जायते। तर्हि संशयकारणेन सिद्धान्तभिन्नः पूर्वपक्षः उपतिष्ठति । यदि छात्रः तत् तत् विषयकं पूर्वपक्षं न उत्थापयति तर्हि अध्यापकः स्वयम् अपि पूर्वपक्षम् उपस्थापयेत् । पूर्वपक्षान् आदाय समाधानम् दद्यात् । तेन तस्य विषयस्य समग्रज्ञानं भवेत् । अधिगमात् पूर्वं तद् विषयकसन्देहं उपस्थापयेत्, पूर्वपक्षं प्रस्तूयात् । सिद्धान्तवाक्यस्य प्रतिषेधवचनम् पूर्वपक्षः, यथा व्याकरणे तत्र पूर्वपक्षरूपेण भाष्यकारः बहून् प्रश्नान् पूर्वपक्षान् प्रस्तौति । समाधानान्यपि प्रयच्छति ।

14) उत्तरपक्षः - Solution

i. लक्षणम् - उत्तरपक्षो नाम आक्षेपाणां तार्किकं समाधानम्[३२] ।

ii. विवरणम् – विचारितस्य अर्थस्य व्यवस्थापनम्। सिद्धान्तानुकूलतर्कोपन्यासः।

iii. विनियोगः - यदा अध्यापकः व्याख्यानावसरे कमपि विषयम् आधारीकृत्य पाठयति तदानीं सन्देहो जायते । सन्देहाधारेण पूर्वपक्ष उपस्थाप्यते । तेषां पूर्वपक्षाणां यथोचितरीत्या तार्किकरीत्या समुचितसमाधानम् उत्तरपक्षः इति उच्यते । अध्यापनवेलायां यदा व्याख्यानं भवति तर्हि तत्र समाधानपक्षरूपेण सिद्धान्तपक्षः उपस्थीयते स एव सिद्धः भवति । अध्यापने यावत्यः तत्र शंकाः समस्याः भवन्ति ताः शंकाः समस्याः निरास्य तावतां पक्षाणां समाधानम् अध्यापकः प्रस्तौति । स एव उत्तरपक्षः सिद्धान्तपक्षः भवति , अर्थात् विषयस्य संशयरहितम् अवगमनं वा अधिगमः उत्तरपक्ष इति उच्यते । संशयनिरासपूर्वकं स्पष्टीकरणं उत्तरपक्षः भवति ।

15) उद्धारः - Defending one's statement by condemning the opposite one

i. लक्षणम् - उद्धारो नाम परपक्षदूषणं कृत्वा स्वपक्षोद्धरणम्[३३] ।

ii. विवरणम् - उद्धारे तु द्वयं समाविशति पूर्वपक्षस्य खण्डनं स्वपक्षस्य मण्डनम्, एतत् द्वयं सम्भूय उद्धारः भवति । यदा छात्राः शंकाः कुर्वन्ति तर्हि अध्यापकः शंकानां निराकरणं करोति। छात्रा आक्षेपान् कुर्वन्ति एतद् एवं नास्ति इति। एतस्य आक्षेपस्य खण्डनम् कृत्वा स्वीयमण्डनम् अध्यापकः करोति स उद्धारः उच्यते ।

iii. विनियोगः - कक्षायां छात्राः परस्परं संवादं कुर्वन्ति, चर्चां कुर्वन्ति तदानीं छात्राणां मध्ये अयुक्तमतस्य खण्डनम्, युक्तमतस्य मण्डनम् भवति । परपक्षस्य निरासः स्वपक्षस्य स्थापनम् उद्धारः अस्ति । कक्षायाम् अध्यापकः अपि प्रतिपाद्यविषयम् अथवा पाठ्यमानविषयं यदा प्रस्तौति, तदानीं छात्राः शंकाः कुर्वन्ति आक्षिपन्ति च तदानीं अध्यापकः छात्राणाम् आक्षेपाणां खण्डनम् करोति समुचितपक्षस्य च मण्डनम् करोति एवं असत् पक्षस्य खण्डनम् सत् पक्षस्य मण्डनम् उद्धारः इति उच्यते ।

16) निदर्शनम् - Example

i. लक्षणम् - दृष्टान्तव्यक्तिः निदर्शनम्[३४]।

ii. विवरणम् - निदर्शनम् इत्यस्य तात्पर्यं अस्ति दृष्टान्तः अथवा उदाहरणम् ।

iii. विनियोगः - अध्यापनकौशलेषु अन्यतमं कौशलम् उदाहरणप्रदानकौशलमस्ति अतः सूक्ष्मशिक्षणे अपि उदाहरणप्रदानकौशलस्य अभ्यासः कार्यते, अपि च अध्यापकः पाठनावसरे पाठ्यमानविषयस्य पुष्ट्यर्थं हेतुं प्रयच्छति ततः हेतोः अनन्तरम् उदाहरणं यच्छति एतेन विषयः सम्यक् बोध्यते अतः उत्तमः अध्यापकः उत्तमाध्यापननिमित्तं बहूनि उदाहरणानि यच्छति तदेव निदर्शनम् उच्यते । कस्यचित् विषयस्य प्रतिपादनार्थं पञ्चयुक्तिवाक्यानामावश्यकता वर्त्तते। परार्थानुमानेन पञ्चयुक्तिवाक्यैः प्रतिज्ञा, हेतुः , उदाहरणम्, उपनयः, निगमनम् इति एभिः तार्किकरीत्या विषयनिरूपणं क्रियते । तत्र तृतीयम् युक्तिवाक्यम् उदाहरणस्य भवति तदेव निदर्शनमिति उच्यते। अत्र पर्वतः वह्निमान् अस्ति इत्यस्य निरूपणं यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसे इति उदाहरणमन्तरेण न सम्भवति ।

17) उपमानम्

i. लक्षणम् - प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्[३५] ।

ii. विवरणम् - उपमानम् एकं प्रमाणम् अस्ति सादृशाधारेण कश्चन बोधः कार्यते यथा – गौरिव गवयः । कश्चिद् गवयं न जानाति चेत् गौ तेन दृष्टा तर्हि गोः सदृशः गवयः भवतीति विज्ञाःजनाः तं जनं बोधयन्ति ,ततः परम् अयं जनः गोः आकृतिं मनसि निधाय अरण्ये प्रविशति तदानीम् सः गोः सदृशं प्राणिनं पश्यति। अयं गवयः एव अस्ति इति निश्चिनोति । अत्र उपमानप्रमाणेन सादृशताधारेण अज्ञातविषयस्य बोधः भवति ।

iii. विनियोगः - यदि कश्चित् बालः गवयं न जानाति तर्हि तं जनं जेष्ठः जनः बोधयति गवयसदृशः प्राणी गौः भवति इति। अध्यापकः अपि निदर्शनेन गौरिव गवयः सूचयति । एतस्य कौशलस्य प्रयोगार्थं शिक्षकः पूर्वमेव समुचितसादृश्यदृष्टान्तानां सादृश्य - उदाहरणानां वा चयनं कुर्यात् । तान्

सादृश्यदृष्टान्तान् कक्षायां प्रस्तूयात् । उपमया सादृश्याधारेण प्रकृतविषयबोध: कार्यते । कालिदास: स्वकाव्येषु उपमानस्य भृशं प्रयोगमकार्षीत्, अत एव कालिदासस्य प्रसिद्धि: उपमा कालिदासस्य इति अस्ति यथा -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥[३६]

अपि च

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।।[३७]

अत्र पार्वतीपरमेश्वरौ कथं संश्लिष्टौ तौ वागर्थौ इव सम्पृक्तौ इति उपमया बोधयति। द्वितीयश्लोके सुदक्षिणा कथं पदक्रमणं करोति तद् उपमया सूचयति यथा स्मृति: श्रुते: अर्थम् अनुसरति तद्वत्। अनेन जटिलविषयोऽपि सुखेन बुध्यते। अध्यापकः अपि कक्षायां विषयप्रतिपादनवेलायां उपमानाधारेण बहून् विषयान् बोधयति ये विषयाः तत्र कक्षायां न भवन्ति परोक्षे भवन्ति तान् अपि उपमानेन बोधयति । उपमानप्रमाणं विषयबोधनवेलायां महद् उपकरोति ।

18) ऊह्यम् – Deduction

i. लक्षणम् - यदनिर्दिष्टं बुध्याऽवगम्यं तदूह्यम्[३८]। अनुक्तकरणमुह्यम् । अत्र यदनिर्दिष्टं युक्तिगम्यं तदूह्यमिति। ऊहो विज्ञातमर्थमवलम्ब्य अन्येषु तथाविधेषु व्याप्त्या वितर्कणम्।

ii. विवरणम् – शास्त्रे यन्न निर्दिष्टम् अध्यापक: स्वप्रज्ञाबलेन युक्त्या वा तद् व्यक्तीकरोति स्फोरयति एतदेव ऊह्यमित्युच्यते। अध्यापकः अदृष्टविषय: य: प्रत्यक्षं नास्ति तम् विषयम् अपि अनुमानप्रमाणेन प्रमाणीकरोति, स्वप्रज्ञाबलेन युक्त्या वा साधयति। ऊह्यम् अनुमानप्रमाणम् इव अस्ति । अनुमितिकरणं अनुमानम् । अनुमीयते अनेन इति अनुमानम् । प्रत्यक्षप्रमाणेन यत् वस्तु न सिध्यति तस्य सिध्यर्थं अनुमानप्रमाणस्य

आवश्यकता अस्ति। अनुमानप्रमाणस्य उदाहरणं - पर्वते धूमं दृष्ट्वा पर्वतो वह्निमान् इति अनुमानम्। तथैव यत्र यत्र धूमः तत्र तत्र अग्निः। कारणं दृष्ट्वा कार्यस्य अनुमानम् यथा मेघं दृष्ट्वा वृष्टेः अनुमानम्। सामान्यतः दृष्टस्य अनुमानेन तस्य विशिष्टरूपं सामान्यतोदृष्टम् अनुमानम्। अस्य उदाहरणं - प्रातःकाले पूर्वदिशि सूर्यं दृष्ट्वा पश्चात् सायंकाले पुनः पश्चिमदिशि दृष्ट्वा अनुमानं क्रियते यत् सूर्यस्य गतिः अस्ति।

iii. विनियोग: - अध्यापने अनुसन्धाने अधिगमे च सर्वत्र उह्येन अतर्कितमपि साधयन्ति बुद्धिमन्तः। सर्वक्षेत्रेषु उह्यमाध्यमेनैव जवेन विकासो जायमानो विद्यते। कश्चित् समस्यायाः समाधानविषये, फलविषये, सम्भावनाविषये वा एवं भवितुं अर्हति इति ऊहनम् कल्पनम् करोति तद् ऊह्यं भवति, तद् आधारेण समाधानम् अन्वियते। अध्यापकः छात्रेषु तर्कप्रवृत्तिवर्द्धनार्थं भिन्नभिन्नसमस्यापरिस्थितिं उद्भाव्य छात्रेषु ऊह्यप्रवृत्तिं जनयति। नूतनकल्पनाधारेण नूतनभव्यदिव्यरचनासु उपकरोति। यथा - अध्यापकः यदा कक्षायां पाठयति तदा छात्राः विद्यमानसमस्याविषये वा सम्भावितसमाधानविषये वा ऊहनम् कुर्वन्ति तेन ते समाधानदिशि प्रवृत्ता भवन्ति। ऊह्यम् एकं बौद्धिककार्यं अस्ति। यदा अध्यापकः कक्षायां छात्रान् पाठयति तदा तस्य अत्यधिकं कार्यम् ऊह्यमाध्यमेन एव प्रवर्त्तते।

19) अतिक्रान्तवेक्षणम् – Retrospection, Reference to a past statement

i. लक्षणम् - अतीतावेक्षणं नाम यदतीतमेवोच्यते[३९]।

ii. विवरणम् - यथापूर्वोक्तस्य पुनःकथनम् अतितावेक्षणम्।

iii. विनियोग: - अध्यापकः यदा कक्षायां पाठयोजनानुसारम् उद्देश्यानि मनसि निधाय तद् अभिलक्ष्य पाठयति। पाठनस्य उपान्ते यद् यत् पाठितम् तत् तत् सम्यक् सर्वं स्पष्टं जातम् न वेति एकवारं पुनः मुख्यानाम् अंशानामवेक्षणं करोति। पाठितविषयस्य मुख्यांशपुनरावृत्तिः क्रियते चेत् च्छात्राः उपकृता भवन्ति। आदर्शशिक्षकाः अध्यापनात् प्रागेव अध्याप्यमानस्य विषयस्य पूर्वसिद्धताम् अवश्यं कुर्युः। क्रमबद्धरीत्या शिक्षणं कुर्युः कृतशिक्षणस्य

समीक्षणमपि विदध्युः ।

20) अनागतावेक्षणम् – Anticipation, Reference to a future statement

i. लक्षणम् - एवं वक्ष्यतीत्यनागतावेक्षणम्[४०] ।

ii. विवरणम् - अनागतावेक्षा नाम यत्रानागतेनार्थेन सम्बन्धिता भवति साऽनगतावेक्षा ।

iii. विनियोग: - अध्यापकः पाठनवेलायां कमपि विषयं यदा आरभते तर्हि तत्र बहवः विषयाः समापतन्ति । आदौ सरलसरलविषयान् स्पष्टीकुर्वन् अग्रे गच्छति । तत्र प्रवाहे यदि कश्चन जटिल: अंश: आयाति तर्हि वदति अग्रे एतस्मिन् विषये स्पष्टीकरोमि इति । यः मुख्यविषयः अस्ति तद् वर्जयित्वा अन्यत्र न गच्छति अन्यविषयः इह अप्रधानः अस्ति एतदर्थं अनागतवेक्षणम् एतस्मिन् विषये वयं अग्रे वक्ष्यामः इति वदति, । एतत् तत्र स्पष्टीकुर्मः । प्रधानप्रकृतविषयम् उपसर्जनीकृत्य विषयान्तरे न गच्छेयम् इति धिया अग्रे वक्ष्यामि इति आध्यापक: वदति अथवा तस्मिन् प्रकरणे विस्तरेण स्पष्टीकुर्म: इति वदति । शिक्षाशास्त्रे व्याख्यानवेलायां अध्यापकः प्रकरणम् आधारीकृत्य पाठं पाठयति परन्तु यः विषयः इदानीं न आयाति तस्य प्रसङ्ग: यदि तस्मिन् प्रकरणे आयाति तदानीं अध्यापकः तस्मिन् विषये अपि छात्रेभ्य: स्वल्पं ज्ञानं ददाति, विस्तरविवरण्म् अग्रे करोति । अर्थात् अनागत: यः विषयः अस्ति अधुना न आगतः आगामिनि प्रसंगे आगमिष्यति अधुना तद् विषयक: प्रसङ्ग:नास्ति इति मत्वा किञ्चिद् एव उच्यते ।

21) प्रसङ्ग: - Restatement, connected Reasoning or Argument

i. लक्षणम् - प्रसंगो नाम पूर्वाभिहितस्यार्थस्य प्रकरणतत्वादिना पुनरभिधानम्[४१] । अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः ।

ii. विवरणम् - पूर्वं यत् वर्णितम्, यत् स्पष्टीकृतम् पुनः प्रसङ्गे सति अथवा पुनः प्रकरणे आगते सति तस्य वर्णनम् स्पष्टीकरणं प्रसंगः इति उच्यते ।

iii. विनियोग: - अध्यापकः यदि अध्यापनवेलायां उद्देश्येषु इमानि उद्देश्यानि

साधयाम इति वदति तर्हि तानि उद्देश्यानि तत्तत्सोपाने तत्र व्याख्यानप्रसङ्गे विषयप्रसङ्गे आगते सति तस्य स्पष्टीकरणं करोति तत्तत्साधयति च । यथा - अध्यापकः काठिन्यनिवारणप्रसङ्गे काठिन्यनिवारणं करोति ततः परं पुनः तस्य यदा विस्तरव्याख्यानम् करोति पुनः तत्र प्रसङ्गः आयाति चेत् तत्रापि पुनः तस्य स्पष्टीकरणं करोति । काठिन्यनिवारणप्रसङ्गे केवलं पदवाक्यदृष्ट्या काठिन्यनिवारणं करोति, व्याख्यानप्रसङ्गे व्याख्यानदृष्ट्या पुनः एकवारं स्पष्टीकरणं करोति । एतत् अतिरिच्य यदा सारांशकथनम् करोति तत्रापि पुनः प्रसङ्गे आगते सति पुनः एकवारं संक्षेपेण तस्य स्पष्टीकरणं भवति । ये कठिनाः अंशाः भवन्ति, कठिनाः शब्दाः भवन्ति, कठिनानि तत्त्वानि भवन्ति तेषां स्पष्टीकरणं प्रसङ्गे प्रसङ्गे एव क्रियते । अध्यापकः विषयस्य दृढतायै तस्य पूर्वकथितप्रसंगस्य पुनः प्रसंगे सति स्पष्टीकरणं करोति। उपनिषत्स्वपि पूर्वं स्पष्टीकृतस्य विषयस्य दृष्टान्तभेदेन पुनः स्पष्टीकरणं कुर्वन्ति ऋषयः । अत्र एवं न मन्तव्यं यदत्र पुनरुक्तिः विद्यते इति। विषयस्य पुनः पुनः स्पष्टीकरणं विषयस्य दृढतायै स्पष्टतायै क्रियते ।

उपसंहारः - शास्त्रतत्त्वसुखबोधाय शास्त्रेषु याः तन्त्रयुक्तयः परिगणिताः ताः क्रोडीकृत्य विस्तरविवरणपुरस्सरम् उपन्यस्तम्। शिक्षाशास्त्रे नानाविषयाः शिक्षणाधिगमसम्बद्धाः भवन्ति। तत्र रचनापक्षः, अभिव्यक्तिपक्षश्च प्रामुख्येन भवतः । इमाः तन्त्रयुक्तयः अध्यापकस्य शिक्षणकौशलं संवर्धयन्ति। अध्यापकः शिक्षणकर्मणि पाठ्यविषयम् अवगमयितुं नानाक्रियाकलापान् करोति, तेषु कर्मसु यदि निपुणतया युक्ते काले युक्ते प्रसङ्गे यत्र या तन्त्रयुक्तिः युक्ता भवति तत्र तां तन्त्रयुक्तिं प्रयुङ्क्ते तर्हि तस्य शिक्षणं प्रभावि फलेग्रहि च भवति। छात्राः अपि आनन्देन लीलया पाठस्य अधिगमं प्राप्नुवन्ति। अध्यापकः पाठपाठनात् प्राक् यानि उद्देश्यानि निश्चिनोति, तानि उद्देश्यानि प्राप्तुं प्रभवति। विस्तरभिया इह तु केवलं दिङ्मात्रनिर्देशः कृतः विद्यते। अध्यापकः स्वीयविवेकेन तन्त्रयुक्तीः उपयुज्य अध्यापनं बोधगम्यं रुचिरं प्रभावि च कर्तुं प्रभवति।

## सन्दर्भसूची

1) Sharma, १९४९, p.१

2) सुभाषित रत्न संग्रह पृ. १९४

3) अजितागमः, १.११५
4) चरकसंहिता. ११. २५
5) अ.उ.५०.१५५, अरुणदत्तः, सर्वाङ्गसुन्दरा, पृ.९२
6) चरकसंहिता १२.६
7) चरकसंहिता ८.१२.४१-४४
8) चरक-सूत्रस्थानम्१/६
9) योगदर्शन १.१
10) अष्टाध्यायी १.१.१
11) सर्वदर्शनकौमुदी
12) चरकसंहिता १२/४१
13) संस्कृतशिक्षणम्- नवीनप्रविधयश्च पृ.८६
14) भाषावृत्तिः पृ. १६
15) मेघदूतम्– संजीवनीटीका मङ्गलाचरणप्रसङ्गे
16) कौटिल्य अर्थशास्त्रम् ५६-२४२
17) चरकसंहिता -१२/४२
18) विष्णुधर्मोत्तरपुराणम् ३/६
19) कौटिल्य-अर्थशास्त्रम्-१५/८
20) सुश्रुतसंहिता ६८/३७
21) सुश्रुतसंहिता.६५/२९
22) विष्णुधर्मोत्तरपुराणम्
23) महाभाष्यम् पस्पशा
24) भाषावृत्तिः पृ. १६
25) विष्णुधर्मोत्तरपुराणम् ३.५.११
26) अष्टाङ्गहृदयम् उत्तरस्थानम् ४०/४
27) (अष्टाङ्गहृदयम्४०/२४)
28) योगसूत्रम्- ३० व्यासभाष्यम्
29) अष्टाङ्गहृदयम् ४९/३१
30) निरुक्तम्, १.२.४.
31) सुश्रुत.उत्तरतन्त्रम्२२
32) कौटिल्य-अर्थशास्त्रम्-

33) चरकसंहिता २८/२९
34) सुश्रुतसंहिता.उत्तरतन्त्रम्
35) न्यायसूत्रम् १.१.६
36) रघुवंशम् १/१
37) रघुवंशम् २/२
38) सुश्रुतसंहिता ६५/८-१०
39) चरकसंहिता ८/२९
40) सुश्रुतसंहिता ६५/२६
41) चरकसंहिता.१२/४३

## सन्दर्भग्रन्थसूची


1) शास्त्री पण्डित चारुदेव १९९६, वाक्यपदीयम्, मोतीलाल बनारसीदास, दिल्ली
2) जिज्ञासु पं. ब्रह्मदत्त सम्पादक: अष्टाध्यायी, १९९८, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
3) मीमांसक पं. युधिष्ठिर १९९२, संस्कृतव्याकरणशास्त्र का इतिहास, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
4) जिज्ञासु पं. ब्रह्मदत्त, प्रथमावृत्तिः, १९९०, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
5) विद्यावारिधि आचार्य विजयपाल, १९९७, काशिका, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
6) शास्त्री भार्गव, १९८७,पाणिनीयव्याकरणमहाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली
7) अग्रवाल वासुदेवशरण, १९९६, पाणिनिकालीन भारतवर्ष, चौखम्बा विद्याभवन, वाराणसी
8) पं. आशुबोधविद्याभूषणः, २०००, न्यायदर्शनम्, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी
9) शास्त्री ढुण्डिराज, १९९८, न्यायसिद्धान्तमुक्तावली, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी
10) शास्त्री पं.उदयवीर, १९९५, वैशेषिकदर्शनम्, गोविन्दराम हासानन्द, दिल्ली,
11) डा. अनन्तराम शर्मा,२०१५, सुश्रुतसंहिता, भाग १,भाग-३, चौखम्बा सुरभारती प्रकाशन, वाराणसी
12) Bhadakamkar, H.M. १९८५, The Nirukta of Yaska,भण्डारकर ओरियन्टल् रिसर्च इन्स्टिट्युट, पुणे
13) अत्रिदेवगुप्त,अनुवादक१९४८, चरकसंहिता, महर्षि अग्निवेश प्रणीत, प्रथम खण्ड, द्वितीय खण्ड, द्वितीय संस्करण , भार्गव पुस्तकालय गयाघाट बनारस
14) शास्त्री गणपति,कौटिल्य-अर्थशास्त्रम्, राष्ट्रियसंस्कृतसंस्थान, दिल्ली
15) शर्मा डा. भीष्मदत्त,२०१२, ऋग्वेदसंहिता, प्रथमभाग, चौखम्बा कृष्णदास अकादमी, वाराणसी,

16) त्रिपाठी डा. ब्रह्मानन्द,१९९८,चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली
17) विष्णुधर्मोत्तरपुराणम् अनुक्रमणिकासहित, मूलमात्र। इस्टर्न बुक लिंकर्स, दिल्ली
18) त्रिपाठी, डा. श्रीकृष्णमणि,२०००, रघुवंशम्, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी
19) Lele, W. K. (२००६) Methodology of Ancient Indian Sciences, Chaukhamba Surbharati Prakashan, Varanasi
20) Neelmegh Bhishagacharya, १९७६ Tantra yukti vichara. Vaidyasarathy Press, Kottayam
21) Bloom, Benjamin Samuel, १९५६, Taxonomy of Educational Objectives, Longmans, Green
22) शर्मा, डा. च.ल.ना. डा.फतेहसिंहः, २००८, संस्कृतशिक्षणम् - नवीनप्रविधयश्च, आदित्य प्रकाशनम्, जयपुरम्।
23) शर्मा प्रो. मुरलीधर, सम्पादक २००३, संस्कृतशिक्षणसमस्याः, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति।

* * *